दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-174 | 1 | अप्रैल 16, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
गतदिने वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् वैशाखकृष्णचतुर्दशी
बैशाख 03 प्रविष्ठांशः मङ्गलमयः भवेत्

2 चतुर्थश्रेण्याः कर्मचारिभ्यः मे-मासपर्यन्तं अवशिष्टधनं (Arrears) उपदानं (Gratuity) च, आरक्षकभ्यः निवृत्तिकाले पदोन्नतिः

3 सर्वेषु विद्यालयेषु समानं शुल्कं ग्रहीष्यते, न भविष्यति कोऽपि भेदभावः- मुख्यमंत्री

4 बिहारराज्ये नूतन-राजनीतिक-अध्यायस्य उद्घाटनम्- सम्राट् चौधरी इत्यनेन शासनसूत्रग्रहणम् गरिमामये शपथग्रहण-समारोहे नूतन-सरकारस्य औपचारिक-गठनम्

## भारतीयजनतादलस्य नेता सम्राट चौधरी बुधवासरे मुख्यमन्त्रिपदस्य शपथं गृहीतवान्



बिहारस्य राजनीति-क्षेत्रे नवीनयुगस्य आरम्भः अभवत्। भारतीयजनतादलस्य नेता सम्राट चौधरी बुधवासरे मुख्यमन्त्रिपदस्य शपथं स्वीकृत्य सत्तायाः सूत्रं गृहीतवान्। तस्य नेतृत्वे सङ्घटितसर्वकारे जनतादलयू (JDU) इत्यस्य वरिष्ठनेतारौ विजय कुमार चौधरी तथा बिजेन्द्र यादवः उपमुख्यमन्त्रिपदे नियुक्तौ। शपथग्रहणसमारोहस्य अनन्तरं शीघ्रमेव विभागानां वितरणम् अभवत्, यत्र भाजपापक्षाय २९ विभागाः तथा जेडीयू-पक्षाय १८ विभागाः प्रदत्ताः।

### मुख्यमन्त्री सम्राट चौधरी

मुख्यमन्त्रिणा स्वसमीपे गृहविभागम् अतिरिच्य अन्याः महत्त्वपूर्णाः विभागाः रक्षिताः। तस्य अधीने पथनिर्माणम्, राजस्वम्, स्वास्थ्यम्, विधिः, उद्योगः, पर्यटनम्, आपदाप्रबन्धनम्, कला-संस्कृतिः, सहकारिता, पर्यावरणं तथा पञ्चायतीराजः च सन्ति।

### उपमुख्यमन्त्री विजय कुमार चौधरी

तस्मै जलसंसाधनम्, संसदीयकार्यम्, भवननिर्माणम्, अल्पसङ्ख्यककल्याणम्, शिक्षा तथा ग्रामीणविकाससहिताः १० विभागाः दत्ताः।

### उपमुख्यमन्त्री बिजेन्द्र यादवः

सः ऊर्जा, वित्तम्, वाणिज्यम्, समाजकल्याणम्, खाद्यं तथा ग्रामीणकार्यसहितानां विभागानाम् उत्तरदायित्वं वहति।

### ऐतिहासिकः अवसरः

सम्राट चौधरी महोदयस्य मुख्यमन्त्रिपदग्रहणेन सह बिहारराज्ये नूतनः इतिहासः रचितः। बिहारस्य इतिहास प्रथमवारं कश्चित् भारतीयजनतापक्षस्य (BJP) नेता मुख्यमन्त्रिपदं प्राप्तवान्। यद्यपि एषः पक्षः दीर्घकालात् सत्तायां सहयोगी आसीत्, परन्तु शीर्षपदं प्रथमवारं प्राप्तम्।

### सम्राट चौधरी महोदयस्य राजनैतिकयात्रा

तस्य राजनैतिकयात्रा अतीव रुचिपूर्णम् अस्ति। सः स्वस्य करियरस्य आरम्भं राष्ट्रियजनतादलात् (RJD) कृतवान्। तस्य पिता शकुनी चौधरी अपि सक्रियराजनीत्यां संलग्नः आसीत्। १९९९ राबड़ीदेवी-सर्वकारे कृषिमन्त्री आसीत्। २०१८ तमे वर्षे भारतीयजनतापक्षं प्रविष्टवान्।

२०२३ भाजपा-पक्षस्य प्रदेशाध्यक्षः नियुक्तः।२०२४ एनडीए (NDA) सर्वकारे उपमुख्यमन्त्री अभवत्। २०२६ सम्प्रति सः बिहारस्य मुख्यमन्त्रिरूपेण राज्यस्य सेवां कुर्वन् अस्ति। विशेषः पश्चिमवङ्गराज्यस्य विधानसभा-निर्वाचनानन्तरं मन्त्रिमण्डलस्य विस्तारस्य सम्भावना वर्तते, येन अन्ये नेतारः अपि सर्वकारे स्थानं प्राप्तुं शक्नुवन्ति।

## केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन दशमीकक्षायाः परीक्षापरिणामः घोषितः



केन्द्रीय-माध्यमिक-शिक्षा-मण्डलेन **(सीबीएसई)** शैक्षणिकसत्राय २०२५-२०२६ तमवर्षस्य दशमीकक्षायाः बोर्ड-परीक्षायाः परिणामः घोषितः। बोर्ड-प्रशासनेन सूचितं यत् अस्मिन् वर्षे उत्तीर्णता-प्रतिशतं ९३.७० वर्तते, यत् विगतवर्षस्य तुलनायां ०.०४ प्रतिशतं अधिकम् अस्ति। अस्मिन् वर्षे अपि बालिकानां उत्तीर्णता-प्रतिशतं बालकानां अपेक्षया अधिकं वर्तते। बालिकानां उत्तीर्णता-प्रतिशतं ९४.९९ इति अङ्कितम्। तिरुवनंतपुरम-विजयवाडा क्षेत्रयोः सर्वाधिकं उत्तीर्णता-प्रतिशतं ९९.७९% इति अभवत्, एतदतिरिक्तं गुवाहाटी क्षेत्रे न्यूनतम् उत्तीर्णता-प्रतिशतं ८७.५०% अभवत्।

छात्राः स्वकीयान् परिणामान् अधिकृत-जालपुटेषु (Websites) cbse.gov.in results.cbse.nic.in cbseresults.nic.in इत्यत्र द्रष्टुं शक्नुवन्ति । अधिकृत-जालपुटैः सह, परिणामाः DigiLocker (डिजी-लॉकर) तथा UMANG (उमङ्ग) सदृशेषु वैकल्पिक-माध्यमेषु अपि उपलब्धाः सन्ति। मण्डलेन उक्तं यत् सर्वेषां छात्राणां परीक्षापरिणामाः सम्बन्धित-विद्यालयानां पञ्जीकृत-ईमेल-पत्रेषु (Email ID) अपि प्रेषिताः सन्ति।

## सुभाषितम्

**आचारः प्रथमो धर्मः,**
**इत्येतद्विदुषां वचः।**
**तस्माद्रक्षेत् सदाचारं,**
**प्राणेभ्योऽपि विशेषतः।।**

भावार्थः- दूसरों के प्रति अच्छा आचरण हमारा सर्वप्रथम धर्म है, ऐसा विद्व्ज्नों का कहना है। इसलिए हमें सदाचार की रक्षा अपने प्राणों से भी अधिक करनी चाहिए।




## अद्यारभ्य देशस्य विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च वर्षे २०२७ तमस्य राष्ट्रियजनगणनायाः प्रथमचरणस्य अभियानं प्रारप्स्यते।

गृहमन्त्रालयस्य घोषणानुसारं अद्यारभ्य देशस्य विभिन्नेषु राज्येषु केन्द्रशासितप्रदेशेषु च वर्षे २०२७ तमस्य राष्ट्रियजनगणनायाः प्रथमचरणस्य अभियानं प्रारप्स्यते। एतद् अभियानं मईमासस्य पञ्चदश दिनाङ्कं यावत् निरन्तरं प्रचलिष्यति, यस्मिन् सर्वकारेण विशेषरूपेण नियुक्ताः प्रशिक्षिताः गणनाकर्मिणः द्वारं-द्वारं गत्वा पारिवारिकविवरणानि आवाससम्बन्धिताः सूचनाः च सङ्ग्रहिष्यन्ति।

अस्मिन् आधुनिकप्रविधेः प्रयोगं कृत्वा डिजिटल-माध्यमेन गणना भविष्यति येन राष्ट्रस्य विकासनीतीनां निर्धारणे सहायता मेलिष्यति तथा च प्रत्येकस्य नागरिकस्य विवरणं शुद्धतया पञ्जीकृतं भवितुं शक्नुयात्।

## संसदः विस्तारित-बजट-सत्रस्य त्रयदिवसीयः विशेषसत्रः अद्य आरप्स्यते



संसदः विस्तारित-बजट-सत्रस्य त्रयदिवसीयः विशेषसत्रः अद्य आरप्स्यते। इदं सत्रम् अप्रैल-मासस्य १८ दिनाङ्कं यावत् चलिष्यति। अस्मिन् सत्रे मुख्यरूपेण 'नारी शक्ति वंदन अधिनियमे' सांविधानिक-संशोधनानां विषये चर्चा भविष्यति। वर्षे २०२३ मध्ये पारितस्य अस्य विधेयकस्य प्रवर्तनाय सर्वकारः त्रीणि संशोधन-विधेयकानि प्रस्तोष्यति। अस्मिन् अधिनियमे लोकसभायां राज्य-विधानसभासु च महिलाभ्यः ३३ प्रतिशतं आरक्षणस्य प्रस्तावः अस्ति।

## पश्चिम-एशिया-संकटस्य मध्ये सर्वकारेण देशे गार्हस्थ्य-LPG-पूर्तिः सुनिश्चिता

पश्चिम-एशिया-संकटस्य मध्ये सर्वकारेण सम्पूर्णे देशे गार्हस्थ्य-एलपीजी (LPG) इत्यस्य शतप्रतिशतं आपूर्तिः सुनिश्चिता कृता। नवदिल्ल्यां आयोजितस्य अन्तर-मन्त्रालयीन-संवाददाता-सम्मेलनस्य अवसरे पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयस्य संयुक्त-सचिवः सुजाता शर्मा अवदत् यत् देशे एलपीजी-इत्यस्य गार्हस्थ्य-आपूर्तिः सामान्या वर्तते। सा सूचितवती यत् एलपीजी-सिलिण्डर-यन्त्राणां फेनिल-पञ्जीकरणम् (Online Booking) ९८ प्रतिशतं यावत् प्राप्तम् अस्ति।मार्च-मासस्य मध्यभागात् आरभ्य अधुना यावत् लक्षैकं चतुस्त्रिंशत्सहस्रं (१,३४,०००) टन् परिमितापेक्षया अधिका व्यावसायिक-एलपीजी वितरिता। सुश्री सुजाता शर्मा उक्तवती यत् चतुर्लक्षं पञ्चाशत्सहस्रं (४,५०,०००) पीएनजी (PNG) संयोजनानि (Connections) प्रदत्तानि। सा अयाचत यत् एलपीजी-सिलिण्डराणां कृष्णविपणनं (Black marketing) रोद्धु २१०० स्थानकेषु अन्वेषणानि (Raids) कृतानि। एतेषु २३७ वितरकाः दण्डिताः तथा च ५८ एलपीजी-वितरकाणां अनुज्ञप्तयः (Licenses) निलम्बिताः।

# चतुर्थश्रेण्याः कर्मचारिभ्यः मे-मासपर्यन्तं अवशिष्टधनं (Arrears) उपदानं (Gratuity) च, आरक्षकभ्यः निवृत्तिकाले पदोन्नतिः




**हिमसंस्कृतवार्ता।** बुधवासरे किन्नौरमण्डलस्य मुख्यलये रिकांगपिओ-स्थिते 'मिनी' क्रीडाङ्गणे हिमाचलदिवसस्य राज्यस्तरीयसमारोहः सोत्साहं आयोजितः। मुख्यमन्त्री सुखविन्दरसिंहसुक्खु प्रातः एकादशवादने राष्ट्रध्वजं उत्तोल्य कार्यक्रमस्य शुभारम्भं कृतवान्। जनसभां सम्बोधयन् मुख्यमन्त्री सर्वप्रथमं समस्तप्रदेशवासिभ्यः हिमाचलदिवसस्य हार्दिकीः शुभकामनाः प्रदत्तवान्।

अस्मिन् अवसरे मुख्यमन्त्रिणा उदीरितं यत् हिमाचलप्रदेशः आत्मनिर्भरतां प्रति निरन्तरं अग्रसरति। तेन उद्घोषितं यत्:

**चतुर्थश्रेणीकर्मचारिणः-:** प्रदेशस्य चतुर्थश्रेण्याः कर्मचारिभ्यः १ फरवरी २०१६ तः ३१ दिसम्बर २०२१ पर्यन्तं देयं अवशिष्टराशिं तथा उपदानं (Gratuity) आगामी मे-मासपर्यन्तं प्रदास्यते। अनेन सर्वकारस्य उपरि ५० कोटिरुप्यकाणां अतिरिक्तभारः भविष्यति।

**नियमितीकरणम्-:** ३१ मार्च पर्यन्तं ये कर्मचारिणः द्विवर्षीयं अनुबन्धसेवासमयं (Contract period) पूर्णं कृतवन्तः, तेषां नियमितीकरणस्य घोषणा अपि कृता। **शिक्षाक्षेत्रम्-:** प्रदेशस्य प्रथमस्य 'डे-बोर्डिंग' विद्यालयस्य आरम्भः रिकांगपिओ तः क्रियते, यः आगामिषु षण्मासेषु सज्जः भविष्यति।

**आरक्षकाणां कृते उपहारः-:** निष्ठापूर्वकं कार्यं कुर्वद्भ्यः आरक्षकर्मचारिभ्यः निवृत्तिकाले पदोन्नतिः दीयते। एतत् तेषां कृते एकस्तरं उच्चं 'मानदपदं' भविष्यति।

### पात्राभ्यः महिलाभ्यः १५०० रूप्यकाणि मासिकम्

अस्मिन् अवसरे मुख्यमन्त्रिणा 'इन्दिरागान्धी-प्रियभगिनीसुखसम्माननिधिः' इत्यस्याः योजनान्तर्गतं किन्नौरस्य पात्राभ्यः महिलाभ्यः १५०० रूप्यकाणि मासिकं प्रदातुं घोषणा कृता। सः अवदत् यत् 'शिपकी-ला' मार्गेण कैलाश-मानसरोवर-यात्रां प्रारब्धुं विषयः केन्द्रसर्वकारस्य समक्षं प्रस्थापितः, एतदर्थं प्रयासाः प्रचलन्ति। एतदतिरिच्य, काङ्गड़ा-मण्डलं पर्यटननगरीरूपेण विकस्यते। शक्तिपीठ-ज्वालाजी तथा श्रीनयनादेवी क्षेत्रयोः पर्यटनविकासाय १५०-१५० कोटिरूप्यकाणि स्वीकृतानि सन्ति।

### करुणामूलकाधारेण अधुना यावत् ६४० नियुक्तयः - मुख्यमन्त्री

मुख्यमन्त्रिणा कथितं यत् करुणामूलकाधारेण (Compassionate grounds) अद्यावधि ६४० नियुक्तयः दत्ताः, ९८० नूतनानि प्रकरणानि च स्वीकृतानि। सः अवदत् यत् केन्द्रसर्वकारेण 'मनरेगा' योजनायाः मूलस्वरूपमेव परिवर्तितम्, येन ग्रामीणविकासे प्रभावः भविष्यति। इदानीं केन्द्रसर्वकारः निश्चितम् आयव्ययकं (Budget) प्रदास्यति। सः नशानिवारणाय 'खेलो हिमाचल चिट्टा मुक्त अभियानम्' इति प्रारब्धुं विषयं अकरोत्। मुख्यमन्त्रिणा उक्तं यत् प्रदेशस्य हरितक्षेत्रं २०३० वर्षपर्यन्तं २९ तः ३२ प्रतिशतं यावत् वर्धयिष्यते। ५०० मेगावाट क्षमतायाः सौरऊर्जासंयन्त्राणि अपि स्थापयिष्यन्ते।

### शिपकी-ला मार्गेण चीनेन सह १ जूनतः आरप्स्यते व्यापारः

मुख्यमन्त्रिणा अवदत् यत् राज्यसर्वकारस्य प्रयासैः शिपकी-ला मार्गेण चीनेन सह सीमाव्यापारः १ जून दिनाङ्कतः पुनः आरप्स्यते, या सर्वकारस्य महती उपलब्धिः अस्ति।प्रधानमन्त्री मोदी राहुलगान्धिश्च हिमाचलदिवसस्य शुभकामनाः दत्तवन्तौ

# हिमाचल-पञ्चायत-निर्वाचनम्- निर्वाचनव्ययविषये आयोगस्य निर्देशाः, इयं भविष्यति अधिकतम-सीमा




**हिमसंस्कृतवार्ताः - शिमला।** हिमाचलप्रदेशस्य आगामि-पञ्चायतीराज-संस्थानां निर्वाचनानि अधिकृत्य राज्य-निर्वाचन-आयोगेन व्ययसम्बद्धाः निर्देशाः प्रसारिताः। जिलापरिषद्- सदस्यपदस्य प्रत्याशिनां कृते निर्वाचनव्ययस्य अधिकतम- सीमा एकलक्षं (१,००,००,०००) रूप्यकाणि निश्चिता अस्ति। अपरपक्षे, खण्डविकास- समिति-सदस्य (BDC Member) तथा ग्रामपञ्चायत-प्रधानपदस्य कृते व्ययस्य कापि सीमा न निर्धारिता। जिलापरिषद्-निर्वाचनानि अपेक्षया बृहत्क्षेत्रेषु भवन्ति, अतः पारदर्शितां रक्षितुं तथा अनावश्यक-धनबलस्य प्रयोगं रोधुं व्ययसीमा निश्चिता कृता अस्ति।

जिलापरिषद्-प्रत्याशिनां निर्वाचनव्यये विशेषनिरीक्षणं भविष्यति। एतदर्थं प्रत्येकं प्रत्याशिना निर्वाचनव्ययस्य पूर्णं विवरणं निर्धारित-प्रारूपे (Format) प्रदेयं भविष्यति। जिलापरिषद्-प्रत्याशिनां कृते नामांकनकाले एकं पृथक् वित्तकोष-संख्याम् उद्घाटयितुम् अनिवार्यं भविष्यति, येन माध्यमेन एव सर्वे निर्वाचन- सम्बद्धाः व्यवहाराः करणीयाः। आयोगेन नियुक्ताः प्रेक्षकाः समये समये एतेषां वित्तकोषसंख्यानां निरीक्षणं करिष्यन्ति, किमपि अनियमनं प्राप्ते सति च कार्यविधिः भविष्यति।

### नगरनिगम-पार्षद-प्रत्याशिनः व्ययसीमा एकलक्षं रूप्यकाणि

राज्य-निर्वाचन-आयोगेन नगर-निकायानां कृते अपि निर्वाचनव्यय-विषये मार्गदर्शिका प्रसारिता अस्ति। नगरनिगमे पार्षदः १ लक्षं रूप्यकाणि, नगरपरिषदि (Council) ७५ सहस्ररूप्यकाणि, तथा नगरपञ्चायतेषु (Nagar Panchayats) पार्षदः ५० सहस्ररूप्यकाणि यावत् राशिं निर्वाचने व्ययितुं शक्नोति।

# पञ्चकर्मणा मन्दीभवितुं शक्नोति जरा-प्रक्रिया, राजकीय-आयुर्वेदिक-महाविद्यालय-पपरोला-नगरस्य शोधे प्रतिज्ञा



**हिमसंस्कृतवार्ताः- कांगड़ा ।** किं वर्धमानायाः आयुसः (जरायाः) प्रक्रिया नियन्त्रयितुं शक्यते? अस्य प्रश्नस्य वैज्ञानिकम् उत्तरम् अधुना आयुर्वेदक्षेत्रात् सम्मुखम् आगच्छति। पपरोला- स्थित- राजीवगान्धी- स्नातकोत्तर-राजकीय- आयुर्वेदिक-महाविद्यालये कृतस्य नूतनस्य शोधस्य अनुसारं पञ्चकर्मणः वमनक्रिया जरायाः गतिं मन्दीकर्तुं प्रभाविनी भवितुं शक्नोति।

आयुर्वेद- विभागस्य सहयोगेन कृतस्य अस्य अध्ययनस्य अनुसारं, वमनकर्मणा शरीरे विद्यमाने 'ऑक्सीडेटिव स्ट्रेस' (ऑक्सीकरण-तनावः) इत्यस्मिन् उल्लेखनीया न्यूनता दृष्टा। 'ऑक्सीडेटिव स्ट्रेस' इति वृद्धत्वस्य अनेकेषां गम्भीररोगाणां च मुख्यकारणं मन्यते। वमनेन शरीरस्य रोगप्रतिरोधक-क्षमतायाम् अपि स्पष्टा वृद्धिः अभवत्। एषः शोधः 'वासन्तिक-वमनोत्सव' काले अष्टादश-दिनानि यावत् नियन्त्रित- क्लिनिकल- ट्रायलरूपेण कृतः। १८ तः ६० वर्षपर्यन्तं वयसः ४० प्रतिभागिनः द्विधा विभक्ताः।एकेन समूहेन वमनकर्म कृतम्, अपरः समूहः नियन्त्रणसमूह आसीत्। विध्यनुसारं प्रतिभागिभिः ३ तः ७ दिनानि यावत् शुद्धघृतस्य सेवनं कृतम्। ततः परं अभ्यङ्ग-स्वेदन-प्रक्रियाः कृताः। वमनात् पूर्वं विशेषाहारेण कफः सक्रियः कृतः, निश्चितदिने च नियन्त्रित-वमनं कारितम्। तदनन्तरं ३ तः ७ दिनानि यावत् नियन्त्रित-आहार-योजना (संसर्जन क्रमः) अनुपालिता। शोधस्य सर्वे जैव- रासायनिक- परीक्षणाः पालमपुर-स्थितस्य 'कॉलेज ऑफ वेटरनरी एंड एनिमल साइंसेज' मध्ये कृताः। शोधकर्तॄणां मतम् अस्ति यत् परिणामाः वैज्ञानिक-मानदण्डेषु सिद्धाः अभवन्।

शोधस्य पञ्च प्रमुखाः संकेताः

- ऑक्सीडेटिव-स्ट्रेस (Oxidative Stress) मध्ये उल्लेखनीया न्यूनता।
- एन्टी-ऑक्सीडेन्ट 'ग्लूटाथायोन' स्तरस्य वृद्धिः।
- चयापचय (Metabolism) तथा मानसिकस्थितौ सुधारः।
- कोलेस्ट्रॉल-प्रोफाइल मध्ये सकारात्मकं परिवर्तनम्।
- रोगप्रतिरोधकक्षमतायाः सुदृढता तथा जरा- प्रक्रियायाः मन्दता।

**शोधस्य सूत्रधाराः** पञ्चकर्म-विभागस्य शोधार्थी डॉ. पङ्कज कश्यपः एतं शोधं कृतवान्। आयुर्वेदम् आधुनिक-वैज्ञानिक- निकषे प्रमाणितुं एतत् महत्त्वपूर्णं पदं मन्यते। मधुमेह- स्थौल्य- हृदयरोगसदृशाणां व्याधीनां मूले 'ऑक्सीडेटिव स्ट्रेस' मुख्यं कारणम् अस्ति। यदि एतस्मिन् विषये अधिकः व्यापकः शोधः भविष्यति, तर्हि आयुर्वेदः वैश्विकस्तरे स्वस्थ-दीर्घायुष्यस्य मार्गदर्शकः भवितुं शक्नोति।

**-अनिल भारद्वाजः, अध्यक्षः, पञ्चकर्म विभागः, आयुर्वेदिक महाविद्यालयः पपरोला।**

# 'चेस्टर हिल' प्रकरणात् छात्रा- हत्याकाण्डपर्यन्तम्, काङ्ग्रेसशासने 'हिमाचलं विक्रयणाय' विधिव्यवस्था ध्वस्ता:- डॉ. बिन्दलः




हिमसंस्कृतवार्ताः- पालमपुरम्। भाजपाप्रदेशाध्यक्षः डॉ. राजीवबिन्दलः पालमपुर-विधानसभाक्षेत्रस्य अन्तर्गतं भाजपा- ग्रामीण-शहरीमण्डलानां संयुक्ततत्त्वावधाने आयोजिते कार्यक्रमे मुख्यातिथिरूपेण भागं गृहीतवान्। अस्मिन् अवसरे कार्यकर्तारः प्रदेशस्य जनविरोधिनीं अकर्मण्यं च काङ्ग्रेस-सर्वकारं समूलं उत्पाटयितुं सङ्कल्पं कृतवन्तः। कार्यक्रमं सम्बोधयन् डॉ. बिन्दलः प्रदेशस्य विधिव्यवस्थां भ्रष्टाचारप्रकरणानि च अधिकृत्य काङ्ग्रेस-सर्वकारस्य उपरि तीक्ष्णप्रहारं कृतवान्। सः अद्यैव सम्मुखम् आगतं 'चेस्टर हिल' भूमिघोटालां तथा च १९ वर्षीयायाः छात्रायाः निर्ममहत्यां च संयोज्य अवदत् यत् हिमाचलप्रदेशः अद्य काङ्ग्रेसशासने "अराजकतायाः अव्यवस्थायाः च" प्रतीकः संजातः अस्ति। डॉ. बिन्दलः अवदत् यत् प्रसारमाध्यमेषु (मीडिया) प्रकाशित-विवरणानुसारं यः व्यक्तिः वार्षिकम् आयं केवलं ६ लक्षरूप्यकाणि दर्शयति, सः कोटिरूप्यकाणां २७५ बीघा परिमितां भूमिं क्रीणाति। एषः प्रत्यक्षसंकेतः अस्ति यत् प्रदेशे भ्रष्टाचारः केन स्तरपर्यन्तं प्राप्तः। "एतद् प्रकरणं केवलं भूमेः नास्ति, अपि तु हिमाचलस्य आत्मनः विक्रयणस्य षड्यन्त्रम् अस्ति। काङ्ग्रेसशासने हिमाचलं 'विक्रयणाय' स्थापितः अस्ति।" सः आरोपं अकरोत् यत् प्रशासनिकतन्त्रं पूर्णतया सन्दिग्धभूमिकायां वर्तते, अधिकारिणश्च परस्परं कलहे निमग्नाः सन्ति, येन कारणेन न तु भ्रष्टाचारे कार्यविधिः भवति, न च जनतायै न्यायः मिलति। "यत्र अधिकारिणः एव परस्परं आरोपान् कुर्वन्ति, तत्र शासनं न अराजकता प्रचलति।" सरकाघाटक्षेत्रे १९ वर्षीयायाः छात्रायाः नृशंसहत्यायाः उल्लेखं कुर्वन् डॉ. बिन्दलः अवदत् यत् एषा घटना सम्पूर्णं प्रदेशं कम्पयति। "यथा अभियुक्तः १५ दिनानि यावत् श्मशाने उपविष्टः दृष्टः, तथापि कस्यापि ज्ञानं न अभवत्, एतत् काङ्ग्रेस- सर्वकारस्य विफलतायाः विधिव्यवस्थायाः च पूर्णपतनस्य जीवन्तमुदाहरणम् अस्ति।" सः अवदत् यत् प्रदेशे अपराधिनां साहसं वर्धितम् अस्ति, सर्वकारश्च पूर्णतया संवेदनहीनः अभवत्। "अद्य हिमाचले कन्या सुरक्षिता नास्ति, भूमिः सुरक्षिता नास्ति, सामान्यजनः अपि सुरक्षितः नास्ति। एतदेव काङ्ग्रेसस्य वास्तविकं स्वरूपम्," इति सः तीक्ष्णप्रहारं कृतवान्। डॉ. बिन्दलः अवदत् यत् एकतः भ्रष्टाचारस्य बृहत्प्रकरणानि सम्मुखं आगच्छन्ति, अपरतः सर्वकारः अपराधान् 'एकाकी घटना' इति उक्त्वा स्वकीय- उत्तरदायित्वात् पलायनं करोति। "काङ्ग्रेसस्य 'व्यवस्थापरिवर्तनं' अधुना 'व्यवस्थापतने' परिवर्तितम् अस्ति।" सः अग्रे अवदत् यत् प्रदेशे 'माफिया राज' चरमसीमायां वर्तते। 'चिट्टा माफिया', 'खनन माफिया', 'भू माफिया', 'स्थानान्तरण माफिया' च सर्वकारस्य उपरि प्रभाविणः सन्ति। एषः सर्वकारः जनतायाः नास्ति, अपि तु माफियानां सर्वकारः संजातः। कार्यक्रमे भाजपायाः वरिष्ठप्रवक्ता त्रिलोक कपूरः, जनपदाध्यक्षा रागिनी रुकवाल, जनपद-महामन्त्री अभिमन्युभट्टः, राजेशरानू च, ग्रामीणमण्डलाध्यक्षः सुरेश पठानिया, शहरीमण्डलाध्यक्षः गोपेश शर्मा इत्यादयः अधिकारिणः कार्यकर्तारश्च उपस्थिताः आसन्। अन्ते डॉ. बिन्दलः अवदत् यत् प्रदेशस्य जनता अधुना सर्वं पश्यति, समयं प्राप्य च काङ्ग्रेस-सर्वकाराय अस्य उत्तरं निश्चितं दास्यति। "एषः सर्वकारः अधुना नैतिकरूपेण सत्तायां स्थातुम् अधिकारं नष्टं कृतवान्। हिमाचलस्य जनता परिवर्तनाय मनः कृतवती अस्ति," इति सः कथितवान्।

# सर्वेषु विद्यालयेषु समानं शुल्कं ग्रहीष्यते, न भविष्यति कोऽपि भेदभावः- मुख्यमंत्री




हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशस्य सर्वेषु विद्यालयेषु अधुना समानं शुल्कं ग्रहीष्यते। शुल्कग्रहणे किमपि वैषम्यं न भविष्यति। बुधवासरे हिमाचलदिवसस्य राज्यस्तरीय- समारोहे रिकांगपिओ क्षेत्रतः मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः शिक्षाविभागस्य अधिकारिभ्यः एतादृशं निर्देशं दत्तवान्। १२ अप्रैल दिनाङ्कस्य अङ्के 'अमर उजाला' पत्रिकया "सर्वकारी- विद्यालयानां शुल्के नास्ति एकरूपता, पृथक् पृथक् गृह्यते शुल्कम्" इति शीर्षकेण एषः विषयः प्रमुखतया उत्थापितः आसीत्। वार्तायाः माध्यमेन सूचितं यत् प्रदेशस्य विद्यालयेषु कथमिव भिन्न-भिन्नं शुल्कं गृह्यते। शिक्षा-मण्डलस्य विद्यालयानां शुल्केषु एव एकरूपता नास्ति इति तर्कं दत्त्वा, प्रदेशे चयनं कृतेषु १५५ सीबीएसई (CBSE) विद्यालयेषु अपि शुल्कविषये व्याप्तं संशयं प्रमुखतया प्रकाशितम् आसीत्। बुधवासरे किन्नौर-जनपदस्य रिकांगपिओ क्षेत्रे हिमाचलदिवसस्य राज्यस्तरीयसमारोहस्य अध्यक्षतां कुर्वन् मुख्यमन्त्री अवदत् यत् विद्यालय-शुल्के कोऽपि भेदः न करणीयः। सः मञ्चतः एव अधिकारिणः आदिष्टवान् यत् छात्रेभ्यः एकसमानं शुल्कमेव स्वीकर्तव्यं येन कोऽपि भेदभावः न भवेत्। ज्ञातव्यं यत् विद्यालय-शिक्षा-मण्डलेन तथा शिक्षा- निदेशालयेन अद्यावधि शुल्कग्रहणाय एकसमानाः नियमाः न निश्चिताः, येन कारणेन विभिन्न-विद्यालयेषु छात्रेभ्यः भिन्नं शुल्कं गृह्यते। अनेन पालकानां छात्राणां च मध्ये भ्रान्तिः असन्तोषश्च व्याप्तः अस्ति। प्रदेशसर्वकारेण अद्यैव १५५ सर्वकारीय-विद्यालयान् सीबीएसई-सम्बद्धान् कर्तुं निर्णयः स्वीकृतः, किन्तु एतेषु विद्यालयेषु अपि शुल्क-संरचनायाः स्पष्टाः निर्देशाः नासन्। एतेषु चयन-प्राप्तेषु विद्यालयेषु अपि हिमाचल- शिक्षा-मण्डलस्य अनुकरणेन शुल्कग्रहणस्य वार्ता कृता आसीत्, किन्तु धरातले अस्य पालनं समानरूपेण न भवति। सर्वकारीय- विद्यालयेषु सर्वाधिकं विसंगतिः सङ्गणक-शिक्षायाः विषये अस्ति। केषुचित् विद्यालयेषु सङ्गणक-शिक्षायै छात्रेभ्यः मासिकं १२० रूप्यकाणि शुल्कं गृह्यते, तत्रैव केषुचित् कोऽपि शुल्कं नास्ति। अपरपक्षे, नवमी-दशमी-कक्षाणां शुल्कं केषुचित् विद्यालयेषु मासिकं २४ रूप्यकाणि अस्ति, केषुचित् तु ६५ तः ७० रूप्यकाणि यावत्। एवमेव एकादशी- द्वादशी- कक्षाणां शुल्केष्वपि महदन्तरं दृश्यते।

# वित्तवर्षे 2025-26 भारतस्य कुलनिर्यातः 860 अर्बुद (Billion) डॉलर परिमितं जातः

वित्तवर्षे 2025-26 भारतस्य निर्यातः 4.22 प्रतिशतं वर्धित्वा 860 अर्बुद (Billion) अमरीकी-डॉलर परिमितात् अधिकः जातः। अस्मिन् वस्तु-सेवा-क्षेत्रे द्वे अपि सम्मिमिते स्तः। अपरपक्षे, आयाते प्रायः 6.5 प्रतिशतं वृद्धिः अभवत्, येन सः 979 अर्बुद अमरीकी-डॉलर पर्यन्तं प्राप्तः। अस्य परिणामतः गतवित्तवर्षे कुलव्यापारघाटा (Trade Deficit) वर्धित्वा 119 अर्बुद डॉलर परिमितात् अधिकः जातः, यदा तु वित्तवर्षे 2024-25 मध्ये एषः 94 अर्बुद डॉलर परिमितात् किञ्चित् अधिकः आसीत्। वाणिज्यमन्त्रालयेन प्रसारितस्य अन्तरिम-आँकडानाम् अनुसारं वित्तवर्षे 2025-26 मध्ये वस्तूनां कुलनिर्यातः प्रायः 441 अर्बुद अमरीकी-डॉलर परिमितः अभवत्।



# बिहारराज्ये नूतन-राजनीतिक-अध्यायस्य उद्घाटनम्- सम्राट् चौधरी इत्यनेन

## शासनसूत्रग्रहणम् गरिमामये शपथग्रहण- समारोहे नूतन-सरकारस्य औपचारिक-गठनम्





**हिमसंस्कृतवार्ताः- राघव नाथ झा।** पटना-नगरस्य लोकभवने बुधवासरे आयोजिते गरिमामये शपथग्रहण- समारोहे बिहारराज्यपालः सैयद- अता- हसनैन- महोदयः सम्राट्-चौधरी-महोदयाय बिहारस्य चतुर्विंशतितम- मुख्यमन्त्रिपदे पद- गोपनीयतायाश्च शपथं दत्तवान्। अनेन सह बिहारराज्ये नूतन-सरकारस्य औपचारिकं गठनम् अभवत्। शपथग्रहणानन्तरं मुख्यमन्त्री सम्राट चौधरी महोदयः पूर्व-मुख्यमन्त्रिणः नीतीशकुमारस्य चरणयोः स्पर्शं कृत्वा तस्य आशीर्वादं प्रार्थितवान्। अस्य समारोहे एषः क्षणः अत्यन्तं चर्चितः जातः, यः भारतीय-राजनीतिक-परम्परायाः मर्यादायाः च जीवदृष्टान्तत्वेन परिगण्यते।

नूतनसर्वकारे जदयू-दलस्य कोटातः विजयकुमार चौधरी, बिजेन्द्रप्रसाद यादव इत्येतौ उपमुख्यमन्त्रिपदे शपथं स्वीकृतवन्तौ। उभयोः अपि महत्त्वपूर्णानि प्रशासनिक-उत्तरदायित्वानि प्रदत्तानि, येन प्रशासनिक- अनुभवस्य राजनीतिक- संतुलनस्य च सम्यक् समन्वयः परिलक्ष्यते। अस्मिन् समारोहे अन्यराज्येभ्यः अपि बहवः प्रमुखनेतारः उपस्थिताः आसन्। तेषु केन्द्रीयमन्त्री जेपी नड्डा, केन्द्रीयमन्त्री चिराग पासवान, भाजपा- केंद्रीय- पर्यवेक्षकत्वेन आगतः शिवराजसिंहचौहान प्रमुखाः आसन्। तदतिरिक्तं भाजपा-प्रदेशाध्यक्षः नितिन नवीन, एनडीए-विधायकाः, गठबन्धन- दलानां वरिष्ठनेतारः च अपि उपस्थिताः आसन्।

एनडीए-गठबन्धनस्य पक्षतः भाजपा- जदयू- सहयोगिदलानां नेतारः एकस्मिन् मंचे समवेताः दृश्यन्ते स्म। अनेन नूतनसर्वकारः सामूहिकनेतृत्वेन सामूहिक- विषयाणा सह कार्यं करिष्यतीति स्पष्टः सन्देशः दत्तः।

शपथग्रहणानन्तरं मुख्यमन्त्री सम्राट चौधरी उक्तवान् यत् तस्य सरकारः बिहारराज्ये विकासं, रोजगार-सृजनं, सुशासनं च सर्वोच्च- प्राथमिकतारूपेण स्वीकरिष्यति। सः अपि अवदत् यत् "मोदी- नीतीश- मॉडल" इति विख्यात- विकास- पद्धत्याः अनुसारेण कार्याणि शीघ्रतया प्रवर्तिष्यन्ते, अद्य एव कार्यारम्भः क्रियते इति।

एतस्मिन्नेव समारोहे उपमुख्यमन्त्रिणोः नियुक्तिः अपि अभवत्। जदयू-दलस्य कोटात् विजयकुमार चौधरी, बिजेन्द्रप्रसाद यादव चेत्येतौ बिहारराज्यस्य उपमुख्यमन्त्रिपदे विधिवत् शपथं स्वीकृतवन्तौ। उभौ अपि वरिष्ठनेतारौ स्तः, ताभ्यां प्रदत्तानि उत्तरदायित्वानि शासन-प्रक्रियायां महत्त्वपूर्णां भूमिकां निर्वहिष्यतः।

अस्मिन् सन्दर्भे उपमुख्यमन्त्री बिजेन्द्रप्रसाद यादव महोदयः जदयू-नेतुः निशान्त-कुमारस्य अनुपस्थितेः विषये उक्तवान्- "तस्य स्वयमेव निर्णयः करणीयः यत् सः राजनीतिक्षेत्रे प्रवेक्ष्यति वा न वा" इति।

समारोहोऽयं सादगीपूर्णः किन्तु अत्यन्तं गरिमामये वातावरणे सम्पन्नः। बहुसंख्यकाः विधायकाः, जनप्रतिनिधयः, प्रशासनिक-अधिकारीणः, समर्थकाः च उपस्थिताः आसन्। नूतन-सरकारस्य गठनसहितं बिहारराज्ये राजनीतौ नूतन-अध्यायस्य सुदृढः आरम्भः अभवत्।

## वर्षाभ्यां चलतः गीता-शिक्षणकेन्द्रस्य सम्पूर्तिकार्यक्रमः




**हिमसंस्कृतवार्ताः- पटियाला।** शिवमन्दिर- अर्बन- एस्टेट फेज-१- इति नामाख्ये स्थाने शिवमन्दिरसमितेः संस्कृतभारत्याश्च संम्युक्ततत्त्वावधाने वर्षाभ्यां चलतः गीताशिक्षणकेन्द्रस्य समारोपसमारोहः जातः। कार्यक्रमे मुख्यातिथिरूपेण रविकुमारः अनुः, विशिष्टातिथिरूपेण च मेजर रविदत्तः त्रिपाठी अभवत्। कार्यक्रमस्य अध्यक्षता डॉ. वीरेन्द्रकुमारमहाभागेन विहिता। कार्यक्रमस्यारम्भः दीपप्रज्ज्वालनेन मंगलगीतेन च अभवत्। मुख्यावक्त्रा डॉ. रूपेंद्र महोदयेन गीतायाः व्यवहारिकजीवने उपादेयता विषयमधिकृत्य निजविचारान् प्रास्तौत्। कर्मयोगविषये ब्रुवतः सः उक्तवान् यत् शुभकर्मभिः जीवनस्य सद्मूल्यं सद्सुखं च प्राप्तुं शक्नुमः। विचारयुद्धे सद्पक्षं गणयितुं गीताज्ञानमेव साधनमस्ति।

अस्मिन्नवसरे गीताकेन्द्रस्य संस्कृतभारत्याश्च परिचयः पटियाला-विभागसंयोजकेन गगनदीप शास्त्रिणा दत्तः। मन्दिरसमितेः अध्यक्षेण डी. सी. गुप्तावर्येण आगतानाम् अतिथीनां स्वागतं विहितम्। कार्यक्रमस्य संचालनं डॉ. रविदत्तकौशिकस्य कुशलनेतृत्वे संजातम् यस्मिन् पञ्चाशतधिकाः नागरिकाः भागम् अगृह्णन्। पर्यायेऽस्मिन् संस्कृतभारती- पंजाब- सहमंत्री अजयकुमारः आर्यः। जिलाशिक्षणप्रमुखः राहुलः आर्यः, मक्खनलालसिंगला, मक्खनजैनः, छज्जुरामवर्यः, राकेशकुमारः, अनीतारानी, सुरेशशर्मादयः उपस्थिताः आसन्।

## कराधानं राज्य-नागरिकयोः मध्ये विश्वासस्य सेतुः : राष्ट्रपतिः द्रौपदी मुर्मु



राष्ट्रपतिः द्रौपदी मुर्मु उक्तवती यत् कराधानं केवलं राजस्वसङ्ग्रहस्य साधनं नास्ति, अपितु इदं राज्य-नागरिकयोः मध्ये विश्वासस्य सेतुः अपि अस्ति। कर-प्रणाली प्रभावशालिनी भवेत्, सहैव सा निष्पक्षा, संवेदनशीला, सन्तुलिता च भवेत्। राष्ट्रपतिः मुर्मु ह्यः नागपुरस्य राष्ट्रिय-प्रत्यक्षकर-अकादम्यां (NADT) भारतीय-राजस्व-सेवा (IRS) इत्यस्य ७८ तमे (अष्टसप्ततितमे) घणस्य प्रशिक्षु-अधिकारिणां विदाई-समारोहं सम्बोधयन्ती आसीत्। अस्मिन् समारोहे महाराष्ट्रस्य राज्यपालः जिष्णुदेव वर्मा, महाराष्ट्रस्य राजस्वमन्त्री चन्द्रशेखर बावनकुले, केन्द्रीय-प्रत्यक्षकर-बोर्ड् (CBDT) इत्यस्य अध्यक्षः रवि अग्रवालः च उपस्थिताः आसन्।अद्य प्रातःकाले राष्ट्रपतिः सेवाग्राम-आश्रमस्य भ्रमणं करिष्यति तथा च वर्धास्थितस्य महात्मा गान्धी अन्तर्राष्ट्रीय-हिन्दी-विश्वविद्यालयस्य षष्ठे दीक्षान्त-समारोहे सम्बोधनं करिष्यति।



# असमीजातेः सप्तप्रकारकाः बैशाखबिहुः

-नयनज्योतिशर्मा, असम

बिहुः असमीयाजातेः जातीयोत्सवः। कृषिकर्मणा सह प्रकृत्या सह वा अस्य उत्सवस्य सम्पर्कः वर्तते। बिहुः वस्तुतः वैदिककर्मविशेषाणां प्रान्तीयस्वरूपमिति वक्तुं शक्यते। बिहुः त्रिविधः बहागविहुः कातिबिहुः माघबिहुश्चेति। बहागविहुः रङ्गालीबिहुः इत्यभिधीयते। वस्तुतः चैत्र- वैशाखमासयोः सङ्क्रान्तिदिनादेव अस्य बिहोत्सवस्य प्रारम्भं भवति। असमीयानववर्षस्य स्वागतार्थम् अयं बिहोत्सवः सप्तदिनानि यावत् प्रचलति। तस्मिनवसरे समग्रे असमप्रदेशे बिहुनृत्य- गीताभ्याम् जनाः नववर्षस्य स्वागतं कुर्वन्ति। विशेषतः अश्वत्थवृक्षः वैदिककर्मणि पञ्चपल्लवेषु अन्यतमः इति मन्यते। बिहुनृत्योऽपि अश्वत्थवृक्षस्य अधः एव अनुस्थीयते। गामोछा इति अङ्गवस्त्रं असमीयाजातेः स्वाभिमानं भवति। अश्वत्थवृक्षेऽपि एषा गामोछा बन्धनं कृत्वा तथा च नर्तकाः शिरसि धृत्वा अस्य बिहुनृत्यस्य परिवेशनं कुर्वन्ति। ते धौतवस्त्रं मूगाकूर्ताञ्च धारयन्ति। नर्तक्यः मूगायाः मेखला-छादर इत्याख्यं वस्त्रं धृत्वा नृत्यं कुर्वन्ति। बिहुगीते ढोल- पेपा- गगना- वंशीत्यादिनां वाद्यानां प्रयोगं भवन्ति।

बैशाखबिहुः सप्तधा विभाज्यते। तत्र चैत्र- वैशाखमासयोः सङ्क्रान्तिदिने गरुबिहुः गोबिहुः वा अनुस्थितो भवति। तस्मिन् दिने दीघलटी- माइखतीवृक्षयोः शाखया गीतमाध्यमेन गोस्नानं कारयित्वा तेषां वंशवृद्ध्यर्थम् गृहस्थाः आशीर्वादं विदधान्ति। बृन्ताकः-अलाबुः इत्यादिना भोजनं कारयन्ति मालामपि धारयन्ति। गोशृङ्गे हलुधतैलमिश्रणं लेपयन्ति। सायङ्काले नवरज्जुना गोशालायां गोवन्धनं कुर्वन्ति। नाहरबृक्षस्य पत्रे वाता-वृष्ट्यादि दुर्योगात् परित्राणार्थं मन्त्रं विलिख्य गृहस्य उपरि स्थापयन्ति। मन्त्रं यथा-

**देव देव महादेव नीलग्रीवः जटाधरः।**
**वातबृष्टिहरदेव महादेव नमोस्तुते।।**

अस्मिन् दिनैव सायङ्काले गृहे गृहे मशकादि अपशक्तिनां नाशहेतुः तारा-कुक्षिपत्रादि अग्नौ दत्वा तस्य धुम्रं व्यजनेन सिञ्चन्ति जनाः। बहागविहोः द्वितीयदिवसं मानुहबिहुः नरबिहुः वा कथ्यते। अस्मिन् दिने जनाः बिहुवान् इत्याख्ये नववस्त्रं धारणं कुर्वन्ति। जेष्ठेभ्यः आशीर्वादं गृह्णन्ति कनिष्ठाः। अस्मात् दिनात् प्राङ्गणक्षेत्रेषु बिहुनृत्यस्य परिवेशनं भवति। तृतीयदिवसोऽयं गोसाइबिहोः देवबिहोः वा पालनं भवति। अस्मिन् दिने जनाः आवर्षस्य मङ्गलं कामयन् मन्दिरं गत्वा भगवतः आशीर्वादं स्वीकुर्वन्ति। वस्त्रशिल्पस्य महत्तं पुराकालादेव असमप्रदेशे वर्तते। बिहोत्सवेऽपि अनेन सह सम्वन्धं स्थापयित्वा बैशाखबिहोः चतुर्थदिवसं तातरबिहुः अर्थात् तन्तुबिहुः इत्यभिधया ज्ञायते। असमीयाभाषया तस्य वयनयन्त्रस्य नाम तातशालः इति। तस्मिन् दिने तातस्य पूजा तथा तातसामग्र्याः परिस्करणादि भवति।

हलम् असमीयभाषया 'नाङल' इति उच्यते। बैशाखबिहोः पञ्चमदिवसेऽस्मिन् हलमुद्दिश्य व्यतितं भवति। यतो हि असमीयासमाजस्य कृषिकार्येन नियतसम्पर्कः वर्तते अतः दिवसस्यास्य महति भूमिका वर्तते। एवं प्रकारेण रङ्गालीबिहोः षष्ठदिवसं चेनेहीबिहुः जियरीबिहुः वा कथ्यते। असमीयासमाजे विवाहितपुत्र्याः गृहं प्रति आमन्त्रणं कृत्वा तस्याः स्वागत-सत्कारं भवति तस्मिन् दिने। बैशाखबिहोः सप्तमदिवसस्य नाम चेराबिहुः इत्यभिधया ज्ञायते। तस्मिन् दिने जनाः १०८ प्रकारकानां शाकानां ब्यञ्जनेन भोजनं कुर्वन्ति। अनेन प्रकारेण असमीयासमाजे आडम्बरपूर्णेन बैशाखबिहोः सप्तबिहोः उद्यापनं भवति

## छत्तीसगढ़स्य सक्ती-मण्डले वेदान्त-विद्युत्-संयन्त्रे दुर्घटना: मृतानां सङ्ख्या १७ जाता

छत्तीसगढ़स्य सक्ती-मण्डले वेदान्त-विद्युत्-संयन्त्रे सञ्जातायां दुर्घटनायां मृतानां कर्मकराणां सङ्ख्या वर्धित्वा १७ (सप्तदश) अभवत्। अपरपक्षे, एकोनविंशत्याः (१९) अधिकाः कर्मकराः चिकित्सालयेषु चिकित्साधीनाः सन्ति, येषु चतुर्णां स्थितिः गम्भीरा वर्तते।राज्य-आपदा-मोचन-बलं (SDRF) घटनास्थले रक्षाकार्ये संलग्नम् अस्ति। कस्यापि विषमस्थितेः निवारणाय संयन्त्रपरिसरे महती सङ्ख्यायां आरक्षकबलं (Police Force) नियोजितम् अस्ति।



## ऑस्ट्रिया-देशस्य चान्सलर-महोदयः भारतस्य आधिकारिक-भ्रमणाय सम्प्राप्तः

ऑस्ट्रिया-देशस्य चान्सलरः डॉ. क्रिश्चियन स्टॉकरः गतदिने स्वस्य चतुर्दिवसीय-आधिकारिक-भ्रमणाय भारतं सम्प्राप्तः। विमानपत्तने युवा-कार्य-क्रीड़ा-राज्यमन्त्री रक्षा खडसे महोदया तस्य स्वागतं कृतवती।विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवालः सामाजिक-माध्यमे (Social Media) एकस्मिन् सन्देशे अलिखत् यत् भारत-ऑस्ट्रिया-देशयोः मध्ये सौहार्दपूर्णाः मैत्रीपूर्णाः च सम्बन्धाः सन्ति। सः उक्तवान् यत् चान्सलर-स्टॉकर-महोदयस्य अनेन भ्रमणन भारत-ऑस्ट्रिया-सन्धिः (Partnership) इतोपि गतिं प्राप्स्यति।






हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

## वार्तासंवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये। एका अतीव दुःखदायिनी वार्ता मया श्रुता। कस्याश्चित् करिण्याः शावकः मृतः। शोकमग्नया तया करिण्या स्वशावकस्य मरणं न स्वीकृतम् इति चलच्चित्रे दृष्टम्।

**काव्या-** नमस्ते नन्दिनि। आम्, सा वार्ता अतीव हृदयद्राविका अस्ति। परन्तु अन्यस्मिन् चलच्चित्रे एका लज्जाकरी घटना अपि सर्वैः दृष्टा। श्यामदेशस्य अतिथिगृहे एकेन भारतीययात्रिणा तत्रत्याः कर्मकराः पीडिताः। अतः सर्वैः जनैः तस्य महती निन्दा कृता।

**नन्दिनी-** सत्यम्, विदेशेषु अस्माभिः सम्यक् व्यवहारः पालनीयः। अन्यां वार्तां शृणु। यष्टिकन्दुक- क्रीडाङ्गणे एकेन दर्शकेन स्वमुद्रिका हारिता। तेन तत्र लघु-चलच्चित्रं निर्मितम्। तस्मिन् समये सप्ततिसहस्ररूप्यकमूल्या सा सुवर्णमुद्रिका पतिता।

**काव्या-** अहो, चलच्चित्रस्य मोहेन तस्य जनस्य महती हानिः जाता। तथापि एका अन्या गम्भीरा वार्ता मया पठिता। एकेन स्नातकोत्तर-उपाधिमता युवकेन द्वादशसहस्र-कार्यालयेषु वृत्तिः प्रार्थिता। तथापि सः एकवर्षं यावत् कर्महीनः एव स्थितवान् अस्ति।

**नन्दिनी-** आम्, अस्माकं देशे उद्योगस्य समस्या अतीव कठिना अस्ति।

## लौकिकन्यायकोशः
## नाविकन्यायः

नौका न भवति चेत् नाविकेन किं प्रयोजनम्? नौकायां सत्यमपि नाविकः न भवति चेत् तया किं प्रयोजनम्? तयोः द्वयोरपि आवश्यकता विद्यते खलु। इष्टफलप्राप्तिः द्वयोः संमलनेन भवति एकेन च न भवतीति अयं न्यायः सूचयति।

डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्

## हास- परिहासम्

यदि चतस्रः महिलाः उपविश्य वार्तालापं कुर्वन्ति, तर्हि सा "परनिन्दा" (चुगली)। 😠
किन्तु यदि चत्वारः पुरुषाः उपविश्य वार्तालापं कुर्वन्ति, तर्हि सा "गोष्ठी" (मीटिंग)। 😵
एतत् नारीभिः सह छलम् अस्ति!

## हास- परिहासम्

**पतिः-** प्रश्नः अस्ति। वदतु कृपया- अस्मिन् संसारे कः सर्वाधिकः दयालुः प्राणी अस्ति? (मनसि विचारं करोति, सम्भवतः मम नाम वदिष्यति 😌)
**पत्नी-** निश्चितमेव उत्तरम् अस्ति- "पत्नी"। 😊
**पतिः-** कथम्? 😳 😨 😵
**पत्नी-** यदि सा त्वाम् तर्जयिष्यति ताडयिष्यति च, तर्हि सा एव त्वाम् स्नेहम् अपि करिष्यति। 😅 🤣 😂

डॉ.विदुषी अग्रवालः